**दिनाङ्क :- 18.08.2026**
**प्रात: - 06:55**

## अथवार्ताः

### शाह - आतङ्कीजालम्

केन्द्रीयगृहमन्त्री अमितशाहः सूचितवान् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे प्रशासनेन स्वातन्त्र्यदिवसात् पूर्वम् आई.एस्.आई. इत्येतत् समर्थितं शाहजादभट्टी-आतङ्किजालं ध्वस्तीकृतम्। सः सूचितवान् यत् प्रशासनेन द्विशताधिकान् सदस्यान् गृहीत्वा तस्य विध्वंसात्मक-आक्रमणानां योजनाः अपि विफलीकृताः। सामाजिक-सञ्चारपटले प्रकाशिते एकस्मिन् सन्देशे सः उक्तवान् यत् सुरक्षाबलैः चतुर्दशराज्याणां विभिन्नेषु स्थलेषु समन्विताभियानानि प्रचालितानि, यैः एतत् जालं ध्वस्तीकृतम्। एतत् भारतस्य आतङ्कवादं प्रति शून्यसहिष्णुतायाः उत्कृष्टम् उदाहरणम् अस्ति। सुरक्षासंस्थाभिः अस्य मासस्य द्वादशदिनाङ्के राज्यारक्षिबलैः सह तत्क्षणं गुप्तसूचनानाम् आदान-प्रदानस्य प्रणाल्याः उपयोगं कृत्वा शाहजादभट्टी-जालेन सम्बद्धानां विध्वंसात्मकप्रयासानां प्रतिरोधाय समन्वितं बहुराज्यीयम् अभियानं प्रचालितम्। एतत् जालं विविधेषु आतङ्किकार्येषु संलग्नम् आसीत्।

### झारखण्ड - विरोधप्रदर्शनम्

झारखण्डे जेपीएससी अथ जेएसएससी चेत्येतयोः परीक्षयोः अभ्यर्थिनां चतुर्विंशति-दिवसीय-विरोधप्रदर्शनस्य अनन्तरं राज्यप्रशासनेन चतुर्विंशत्यधिक-द्विसहस्रतमवर्षस्य जेएसएससी-सीजीएल्-परीक्षा अथ च टीडीपीएल्-संस्थया आयोज्यमानाः सर्वाः प्रतियोगिपरीक्षाः निरस्ताः। मुख्यमन्त्री हेमन्तसोरेन् ह्यः सायं विशेषमन्त्रिमण्डलोपवेशनस्य अध्यक्षतां कृत्वा एतत् निर्णयं घोषितवान्। राज्यप्रशासनेन चतुर्दशाधिक-द्विसहस्र-तमवर्षादारभ्य झारखण्डलोकसेवायोगेन अथ झारखण्डकर्मचारिचयनायोगेन च आयोजितानां नियुक्तिपरीक्षाणां व्यापकपरीक्षणस्य अपि आदेशः प्रदत्तः। किन्तु छात्रनेता पीयूषकुमारः उक्तवान् यत् एकादशतः त्रयोदशपर्यन्तानां जेपीएससी-परीक्षाणां तथा केन्द्रीयान्वीक्षण-अभिकरणस्य अन्वेषणात् सम्बद्धप्रदर्शनकारिणां याचनाः अद्यापि विचाराधीनाः सन्ति। प्रदर्शनकारिणः छात्राः उक्तवन्तः यत् ते स्वीया-वशिष्टयाचना-विषये चर्चां करिष्यन्ति तथा अग्रिमकार्याचरणविषये निर्णयं करिष्यन्ति।

### दिल्ली - चिकित्सास्थानानि

दिल्लीप्रशासनेन चरणबद्धरीत्या स्नातक-स्नातकोत्तर-अतिविशेषज्ञता-स्तरीयचिकित्सकीय-शिक्षास्थानानां सङ्ख्यां वर्धयित्वा राष्ट्रिय-राजधान्यां चिकित्साशिक्षायाः क्षमतां वर्धयितुं सज्जः अस्ति। अस्य योजनायाः अन्तर्गतं प्रशासनेन त्रिमुखी-कार्यनीतिः स्वीकृतास्ति। अस्यां नवसंस्थानां स्थापना, विद्यमानसंस्थानां विस्तारः तथा स्नातकोत्तर-उन्नतचिकित्सकीय-कार्यक्रमाणां विस्तारश्च सम्मिलिताः सन्ति।

### करलम् – विझिञ्जम् - समुद्रपत्तनम्

केरले विझिञ्जम्-समुद्रपत्तनात् प्रत्यक्षनिर्यातः आयातश्च अद्य आरभ्यते। मुख्यमन्त्री वी. डी. सतीशन् प्रातः पादोन एकादशवादने सेवायाः उद्घाटनं करिष्यति। केन्द्रीयपत्तन-पोतपरिवहन-जलमार्गमन्त्री सर्बानन्द-सोनोवालः अस्मिन् अवसरे मुख्यातिथिरूपेण

उपस्थितः भविष्यति। केरलस्य विझिञ्जम्-पत्तनात् वस्तूनां प्रत्यक्षनिर्यातः आयातश्च अद्य आरभ्यते, येन पत्तनस्य कार्यसञ्चालने नवचरणस्य प्रारम्भः भविष्यति।

**ऋतुविभागः**

भारतर्तुविज्ञानविभागेन अद्य झारखण्डे अतिवृष्टिम् आलक्ष्य रक्तवर्णपरा सञ्चेतना प्रसारिता। ऋतुविभागेन अद्य बिहार-छत्तीसगढ-पूर्वमध्यप्रदेश-हिमाचलप्रदेश-ओडिशा-पश्चिमोत्तरप्रदेशानां च विभिन्नेषु भागेषु अतिवृष्टेः सम्भावना पूर्वानुमानिता।

**बैड्मिण्टन्-विश्वस्पर्धा**

बैड्मिण्टन्-क्रीडायां भारतस्य आयुषशेट्टी नवदिल्ल्याम् आयोजितायां बीडब्ल्यूएफ्-बैड्मिण्टन्-विश्वस्पर्धायां पुरुषाणाम् एकलवर्गस्य प्रथमचरणे विश्वस्य प्रथमक्रमाङ्कितं वर्तमानविजेतारं च चीनदेशीयं शी यू क्यूई इत्येनं पराजित्य विजयम् अवाप्तवान्। पी. वी. सिन्धुः तथा महिलानां युगलवर्गस्य भारतीययुगलं त्रीसा जॉली-गायत्री गोपीचन्दः अपि द्वितीयचरणे प्रविष्टे। एवं भारतीयबैड्मिण्टन्-क्रीडकाभिः स्पर्धायां उत्कृष्टः शुभारम्भः कृतः।

**॥ इति वार्ताः॥**